# Hanumatprasada Stotram

# હનુમત્પ્રસાદસ્તોત્રમ્

## Document Information

Text title : Hanumatprasada Stotram

File name : hanumatprasAdastotram.itx

Category : hanumaana, stotra

Location : doc_hanumaana

Author : (bhairojI) raNganAtha

Proofread by : Rajesh Thyagarajan

Description/comments : From Stotrasamuchchaya 2, Edited by Pandit K. Parameshwara Aithal

Latest update : May 10, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 29, 2023

*sanskritdocuments.org*

# હનુમત્પ્રસાદસ્તોત્રમ્

વિલાસો વૈદેહીહૃદયકમલોન્મીલનકલા-
વિદગ્ધો વાચાં યઃ સમભવદશોકાવનિતલે ।
પ્રમાદ્યલ્લઙ્કેશસ્મયવિદલનોદ્દામમહિમા
સ દદ્યાદસ્માકં સુરભિરિહ વાચાં મધુરતામ્ ॥ ૧॥

ત્વિષામીશં દેવં વિયતિ સમુદઞ્ચત્સ્વકિરણં
સુરદ્રોર્મન્વાનઃ ફલમિતિ પરીપાકમધુરમ્ ।
ગ્રહીતું તં માતુર્બહિરવતરન્નેવ જઠરાત્
સમુદ્યુક્તો યોઽભૂત્ સ વિતરતુ ધાટીં મમ ગિરામ્ ॥ ૨॥

તુરાસાહિ સ્તોકં રચિતવતિ યસ્મિન્નવિનયં
વિતન્વન્તં સ્તબ્ધં બધિરમવશં લોકમખિલમ્ ।
સમાધાતું ક્લૃપ્તં કતિ કતિ સમીરં સ્તુતિગિરઃ
સમન્તાદ્વૈધાત્ર્યો દિવિ સમુદિતા નઃ સ શરણમ્ ॥ ૩॥

તપસ્તપ્ત્વા તીવ્રં જગતિ શરદાં યચ્છતમહો
સુરાણાં સર્વેષાં સમભિલષિતં ચાપ્યસુલભમ્ ।
તદસ્મિન્ બ્રહ્માસ્ત્રં સમજનિ યયા કુણ્ઠિતબલં
નમસ્તસ્યૈ શક્ત્યૈ પ્રણતજનગત્યૈ ભવતુ મે ॥ ૪॥

પુરસ્તાદુલ્લોલોચ્ચલદલઘુવીચીતરલિતં
પયોધિં સંવીક્ષ્ય દ્રુતગલિતધૈર્યે કપિકુલે ।
જજૃમ્ભે ગમ્ભીરા તનુરધિમહેન્દ્રક્ષિતિધરં
યદીયા દિવ્યા સા ભવતુ મમ ભવ્યાય મહતે ॥ ૫॥

મહાવેગે તસ્મિન્ તરતિ જલધિં સાહ્યવિધયે
સમાયાતાઃ કેચિન્ન પરિગણિતાઃ કાર્યવશતઃ ।
વિનશ્યદ્વિશ્વાસે મરણશરણે દુર્ગતજને
સુખં વા દુઃખં વા કિમુ કલયતે કાર્યપરતા ॥ ૬॥

ગભીરપ્રોન્મીલન્નતવલિતનાભીવિલસિતં
મદોદ્યલ્લોલમ્બદ્યુતિરુચિરરોમાવલિયુતમ્ ।
સમુન્મીલત્સાન્દ્રત્રિવલિજિતગઙ્ગામ્બુલલિતં
નતાઙ્ગીવૃન્દં કો ભવતિ વિમુખો વીક્ષ્ય યદૃતે ॥ ૭॥

સ્ફુટન્મલ્લીમાલાકલિતકબરીભારરુચિરાઃ
સમઞ્ચદ્વક્ષોજદ્વયવિહતકોકીમદભરાઃ ।
સમૃધ્યત્તારુણ્યા નિશિ વિવસના વીક્ષ્ય યુવતી-
ર્વિના તં ધીરાગ્ર્યં જગતિ ગણયેત્ તુચ્છમિહ કઃ ॥ ૮॥

ત્રિલોકીકલ્યાણી ત્રિષવણપરાણામભિમતા
ત્રયીવેદ્યા સ્તુત્યા ત્રિદશપતિસન્ત્રાણનિપુણા ।
દિદીપે શાખેવ ક્ષિતિનિપતિતા પ્રોન્નતતરો-
રશોકોદ્યાને યન્નયનસુભગા દીપ્તિકલિકા ॥ ૯॥

દયાસારદ્રોણી દરદલિતપઙ્કેરુહરુચિઃ
શરજ્જ્યોત્સ્નાધારા શમધનજનાનન્દજનની ।
અશોકોદ્યાનેઽર્ચિઃકલિતકરુણી કાપિ રુરુચે
યદગ્રે કલ્યાણી કલયતુ સ નઃ કામિતમિહ ॥ ૧૦॥

વિલુપ્તે વિશ્વાસે વિગતવતિ ધૈર્યે દ્રુમતલે
નિરૂપાભિર્હહો વિનયરહિતાભિઃ પરિવૃતૌ ।
નિદેશે યો ભાવઃ સમજનિ રહો ભૂષણવરે
ચિરાદ્ દૃષ્ટે દેવ્યા તમનુગદિતું કો નુ ચતુરઃ ॥ ૧૧॥

પટીયાન્ પાથોધેઃ સલિલમખિલં શોષકલિલં
વિધાતું લઙ્કાં વા ભસિતકલુષાં મારુતસખઃ ।
યદીયં વાલાગ્રં સ્વયમધિગતો નાદહદહો
સ મે દેવો હાર્દં વ્યપનયતુ ગાઢાન્ધતમસમ્ ॥ ૧૨॥

સમુત્સાહં બ્રૂમઃ કથમિવ કપીનાં યદુદિતે
સમુત્કણ્ઠા સર્વઙ્કુષપટુનિ ગમ્ભીરવચસિ ।
અહો દૃષ્ટા સીતેત્યમૃતરસનિષ્યન્દમધુરે
નિષોદદ્વાલાનામિવ સ જયતાન્માતૃવચને ॥ ૧૩॥

યદાનીતે સાન્દ્રસ્ફુરદનુપમાનન્દલહરી

    યથા ધેનોર્વત્સેઽસ્રવદિવ જગન્મૂર્તિહૃદયે ।
સ દેવીમૂર્ધાલઙ્કરણમહિતે દૃષ્ટિવિષયે
    મણૌ સ્યાન્મે ભૂત્યૈ પ્રણતજનચિન્તામણિવરે ॥ ૧૪॥

જયતુ જયતુ રમ્યં બ્રહ્મચર્યસ્ય ભાગ્યં
    જયતુ જયતુ દેવ્યા અઞ્જનાયાશ્ચ ભાગ્યમ્ ।
જયતુ ચ રઘુવીરે ભક્તિમદ્ભાગધેયં
    જયતુ વિશરણાનાં પક્ત્રિમં ભાગધેયમ્ ॥ ૧૫॥

ભૈરોજીરઙ્ગનાથેન કૃતં સ્તોત્રં હનૂમતઃ ।
ભૂયાદ્ ભૂત્યૈ રસવિદાં ભક્તિભાજાં હનૂમતિ ॥ ૧૬॥

ઇતિ (ભૈરોજી) રઙ્ગનાથકૃતં શ્રીહનુમત્પ્રસાદસ્તોત્રં સમ્પૂર્ણમ્ ।
સ્તોત્રસમુચ્ચયઃ ૨ (૯૯)

Proofread by Rajesh Thyagarajan

*Hanumatprasada Stotram*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*